Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४०२

Title छत्र पद्धति १०मा ध्याय:

Author ×

Extent ८ Age ×

Subject धर्मशास्त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

सूत्रपद्धतिदशमाध्यायः

४४०९

4409

F.=8

© Dharmartha Trust J&K. Digitized by eGangotri

सुावेकुंठसेदं सुासु कदेवस्यांसे

२५८

हगपदति;

© Dharmartha Trust J&K. Digitized by eGangotri

१ अथात्यग्निष्टोमोलिख्यते॥ तत्रहिरण्यशतंगावदक्षिणानवासोश्वदक्षिणानचचतुष्टोमेनरथंतरपृष्ठेनात्यग्निष्टोमेना
हंयक्ष्यइतिवरणे। सर्वमत्राग्निष्टोमवत्। स्तुत्यायांविशेषः। पात्रयोजने। खादिरंचतुरस्रंषोडशिपात्रमधिकं। सतु
करणमग्निष्टोमवत्। आग्नेयंसवनीयएकादशिनीवा। सोमंमातिरीरिचइत्यनेनहोमः। प्रभावयेत्तुक्थ्यादिष्विति सू
त्रात्। अस्यचोक्थ्यात्पूर्वंनिर्दिष्टत्वात्। अग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोडशीति। अत्रप्रातःसवनेआग्रयणाग्र
हणानंतरं। माध्यंदिनेवाग्रयणानंतरंतृतीयसवनेवाग्रयणानंतरंषोडशिनोग्रहणं। यज्ञायज्ञीयस्यपात्रग्रहणान
नंतेषेषपूर्वकंसर्वेषांसदोभिमर्शनादिसमर्थनं। अत्रवाषोडशि[illegible]हुतहुतोग्रहणं। आतिष्ठवृत्रहन्नितिमंत्रेण
गृह्णातीतिवा। परिमार्जनं। प्रदक्षिणोत्तरस्थापनं। एषतेयोनिरिंद्रायत्वाषोडशिनइतिखरेसादनं। होतृचमसा
द्विशुस्सर्वस्यहुतशेषस्तोमस्यविभज्योन्नयनं। अत्रोपस्थानोपात्तमयहिरण्यहस्तःस्यास्तोत्रोपाकरणमंत्रादीनांषडशिव
मीणांअभावः। तेनएवमेवस्तोत्रोपाकरणमुपावर्तध्वमिति॥ स्तोत्रांतेहोताशंसति। तत्रविहृतान्नुत्सरुक्थ्याथा
व मोदेवंतुसदानेत्यतिगरः॥ मोदामोदैवोथोमुतिप्रणवे। इतरात्रप्याकृतएव। शस्त्रांतेउमित्येतिगरः। प्रदक्षिणावृत्ती
तरस्थापनं। अध्वर्योग्रहादानं। चमसाध्वर्यूणांचमसोपादानं। आश्राव्योक्थ्यशापजसोमानामितिप्रैषः। ग्रहस्यचम १
सानांचवषट्कारानुवषट्कारयोर्होमः। प्रदक्षिणोत्तरस्थापनं। इदमिंद्रायषोडशिनइदंममइतित्यागो। अध्वर्युहोतृ

मदेई

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यां इंद्र श्चसंश्वाडिति ग्रहः शेषमस्नाइ इति संप्रदायः। इंद्रश्चेति मंत्रो न भवतीति याज्ञिकाः। होतृः सर्वचमसेभ्यश्चमसि
नः शृष्ट्वा वषट्कारनिमित्तो भक्षः। चमसिनां होतारं शृष्ट्वा समाख्यानिमित्तः। सर्वभक्षाश्चमसाः। मार्जालीये ग्रहणां च
मसानां प्रक्षालनं। ततउल्मुकसमासाद्याग्नीध्रप्रवेशनांतं सर्वमग्निष्टोमवत्॥ इत्यग्निष्टोमः॥ अथोक्थ्यसंस्थो वि इत्य
शेष उच्यते॥ तत्र वरणे चतुष्टोमेन बृहत्पृष्ठेन हिरण्यशतगव दक्षिणेन वासोश्व दक्षिणेन चोक्थ्यसंस्थेन ज्योति
ष्टोमेनाहं यक्ष्ये। स्तुत्यायां अपरराज्ञे याज्यासादने द्विगुणरशने द्वे। यमग्न इति प्रथमपरिध्यालंभः। प्रतिप्रस्थातः प
शुभ्यामेहीति प्रैषः। द्वौ छागौ सवनीयपशू। द्वयोरेकेन तृणेनोपाकरणं। अग्नये जुष्टं नियुनज्मीति प्रथमस्य यूपे
नियोगः। इंद्राग्निभ्यां जुष्टमिति द्वितीयस्य यूप एव नियोगः॥ संज्ञपयान्वगमत्। संज्ञप्तोपशू। तयोरेव वपाश्रप
ण्योः प्रदेशांतरे द्वितीयवपाश्रोणवनं॥ माहिर्भूर्तं माप्रदाकुः। स्रुतेघ्न चरेति प्रतिप्रस्थातः प्रैषः। अग्निं गच्छेंद्राग्नी
गच्छेति प्राणदानं। प्रियाभ्यां धामभ्यां प्रियं सदः आसीदतमिति वपयोरासादनं। अग्नये छागस्य वपायै मेदः व
पां मेदः प्रस्थितं प्रेष्य। इंद्राग्निभ्यां छागस्य वपायै मे० वपां मेदः प्रस्थितं। माध्यंदिनीयसवनीयपात्रासादने ऐं
द्राग्नस्य द्वादशकपालान्यधिकानि। शेषमग्निष्टोमवत्॥ पात्री द्वयं। पूर्वमाग्नेयस्य पशुपुरोडाशग्रहणं। तत ऐंद्रा
ग्नस्य। तत ऐंद्रादिसवनीयानां॥ विभज्यालंभे। इदमग्नेरिंद्राग्न्योरिंद्रस्य च॥ इदमिंद्रस्य हरिवत इंद्रस्य पूषण्वतस्य॥

© Dharmartha Trust J&K. Digitized by eGangotri

२ एकस्मिन्नेव शूले द्वयोर्हृदययोः प्रतर्दनं। एकस्यामेवोखायां द्वयोरपि पश्वोरवदानश्रपणं। एकस्य पशोरवदानानि। व
स्त्रादीनाबधनीयानि असंकरार्थं। त्रिः प्रस्तुतयोर्हृदययोरुन्नमेकुरुतादिति संप्रैषः। द्वाभ्यां पशुपुरोडाशाभ्यां यागः। तत्र
जुहूपभृतोरुपस्तारः। जुह्वां मध्यात्पूर्वार्द्धाच्चावदानं। अभिघारः। [illegible]ः। तत उपभृत्युत्तरार्द्धादवदानं नाभिघारः। अ
तिक्रम्याश्राव्याग्नये पुरोडाशं प्रेष्य। वषट्कृते होमः। प्रत्येत्य जुह्वामुपस्तारः। द्वितीयपुरोडाशमध्यपूर्वार्द्धावदानं। अव
घ्रतोऽवाचनं। इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहि। उपर्यभिघारः। कृताध्यंगः। उत्तरार्द्धादुपभृत्यवदानं। द्विरभिघारः। आ
श्राव्येन्द्राग्निभ्यां पुरोडाशं प्रेष्य॥ कृत्वा समानीय निर्गुणां स्विष्टकृद्यागः। ऐन्द्राग्नस्य चतुर्द्धाकरणं षडवत्तं भागानाममाकः।
आग्नेयस्य सर्वं भवति॥ तृतीयसवने आग्रयणग्रहणानंतरमुक्थ्यस्थाल्यां उक्थ्यग्रहणं एकयैवोन्नेतृधारयोपयाम
गृहीतइति। एषते योनिरुक्थेभ्यस्त्वेति खरेसादनं। ततः शृतं शृत्वा शिरासेकादि। प्रतिप्रस्थातः पश्वोः संवदस्वेति। पशु
प्रचारे प्रथमं जुहूपभृतोर्वसाहोमहवन्यां प्राशित्रेडापात्र्यां चोपस्तारः। जुहूपभृतोर्हिरण्यावधानं। मनोताप्रैषः॥
प्रथमपशोर्जौहवानि जुह्वां अपभृतान्युपभृति। जुह्वामेव हिरण्याभिधानाभिघारौ। नोपभृति॥ वसाग्रहण्यां याद्गुल
नांतं। प्राशित्रेडयोरवदानं। नोपर्यभिघारः। जाघनीगुदयोर्निधानं। पत्न्यै पशुसंमर्शनं। अग्नये छागस्य हविषोऽनुब्रूहि हविः २
प्रस्थितः। वसाहोमः। वसाशेषं पार्श्वांतरे कृत्वा। जुह्वां वसाहोमहवन्यां [illegible]रः। जुह्वां हिरण्यावधानं। द्वितीयपशो

2

© Dharmartha Trust J&K. Digitized by eGangotri

जौह्वराशि त्वक्षां अपमृतामुपभृति। उभयत्र हिरण्यावधानम् स्रुचा दभिगारौ। चमसग्रहणाय प्रक्षालनांतं। आशित्रे उदयोरव
दानं। उडाया द्विरभिघारादि। इंद्राग्निभ्यां छागस्य हविषो हवि। प्रस्थितं सोमं प्रभावमेति प्रैषः। यज्ञायज्ञियस्य पात्रप्र
क्षालनांते प्रपत्रक्ष्य विग्रहाः। तत्र प्रथमं प्रशास्तुः प्रसहीति प्रैषः। सदोभिमर्शनादि सर्वेषां सर्पणं। ततो धर्तुरक्ष्यपा
त्रमादायो क्ष्यस्थाल्यामिंद्रावरुणाभ्यामिति मंत्रेण स्थालीस्थसोमस्य तृतीयं भागं गृह्णाति॥ परिमार्जनं। प्रदक्षिणेत
रथावृत्ती॥ तूष्णीं ग्रहासादनं। प्रशास्त्रे चमसपूर्वकं चमसोन्नयनं। तेनाभ्यां ग्रहमुपस्पर्श्य पावर्त्तेध्वमिति होत्रे पाकर
णं। होत्रांते प्रशास्तुः शसं। तत्राध्वर्योः प्रतिगरः। शस्त्रांते प्रदक्षिणेतरथावृत्ती। अध्वर्युग्रहमादत्ते चमसाध्वर्यवश्च म
सान्। आश्राव्यात्यशायनसोमानामिति प्रैषः। प्रतिवषट्कारं सर्वेषां होमः। इदमिंद्रावरुणाभ्यामिदमग्नयइ इति त्या
गौ। अध्वर्योः प्रदक्षिणेतरथावृत्ती। ग्रहशेषस्य प्रशास्त्रे चमसे प्रासेकादि पात्रप्रक्षालनांतं प्रातःसवनोक्ष्य विग्र
हवत्। ततः प्रतिप्रस्थातुर्द्वौ उक्ष्यविग्रहौ प्रातःसवनेद्रवग्रहग्रहणमंत्रे विशेषः। इंद्राबृहस्पतिभ्यामिति ब्रा
ह्मणाच्छंसिविग्रहे तुक्ष्यविग्रहणं। इदमिंद्राबृहस्पतिभ्यामिति त्यागः। इंद्राविष्णुभ्यामिति। अच्छावाको क्ष्य
विग्रहे ग्रहणमंत्रः। इदमिंद्राविष्णुभ्यां। अन्यत् सर्वं पात्रप्रक्षालनांतं प्रातःसवनवत्। ततः पात्रप्रक्षालनांते उल्मु
कसमासादि अनुयाजाः॥ सूक्तवाके॥ अग्नेरिंद्राग्न्योर्वनस्पतेरिंद्रस्य वसुमतः। अग्निरिंद्राग्नी वनस्पतिरिंद्रो वसुमानि

© Dharmartha Trust J&K. Digitized by eGangotri

३ ति। प्रस्तरहोमत्यागे। इदमग्नय रुद्रमिंद्राग्निभ्यां वनस्पतये इंद्राय वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजव
ते बृहस्पतिमते विश्वदेव्यावते देवेभ्य आज्यपेभ्यो अग्नये होत्राय वाजिभ्यः॥ अन्यत्सर्वमग्निष्टोमवत्॥ इत्युक्थ्यः समाप्तः॥
३॥ अथ षोडशिसंस्थे विशेष उच्यते॥ वरणे चतुष्टोमेन रथंतरपृष्ठेन हिरण्यशतेन गवं दक्षिणेन वासोश्व दक्षिणे
न षोडशिसंस्थेन ज्योतिष्टोमेनाहं यक्ष्य इति॥ शुंठा लोहा कर्णी सोमक्रयणी॥ शुंठा श्वेतपीतमुखी। वेष्टितमुखी
२ वा॥ पीतपृष्ठी वा॥ लोहाकर्णी रक्तकर्णी॥ सुत्यायां अपरराते पात्रासादने॥ द्वे वपाश्रपण्यौ॥ द्वे शूले॥ द्वे मुखे॥ ति
स्रो द्विगुणरशनाः। यमन्न इति रराघालंभनं॥ तस्मीमेव हविर्द्धानमध्ये प्रवेशो वा॥ पात्रयोजने। खादिरं चतुरस्रं
षोडशिपात्रमधिकं॥ त्रयः सवनीयपशवस्तत्र द्वौ छागौ॥ तृतीयो मेषः॥ प्रतिप्रस्थातः पशुभिरेहीति प्रैषः॥ च
षालं यूप एव बंधनात्॥ अग्नेये जुष्टं नियुनज्मि। इंद्राग्निभ्यां जुष्टं। एतौ छागौ॥ इंद्राय जुष्टमिति मेषं॥ संज्ञप
यात्यगमन्॥ संज्ञप्ताः पशवः। माहिर्भूतमापृदाकुः। अनयोर्वपाश्रपण्योः साधारणो मेषस्य पृथक्॥ अनेक
पाशुकधर्मा एकादशिनाम्नुक्ताः॥ शृतां प्रचरंति यावभ्यामित्याद्यापयोरासादनं॥ प्रियेणेति मेषवपा
याः॥ अग्नये छागस्य वपायै वपां। २ इंद्राग्निभ्यां छागस्य वपायै वपां मेदः प्रस्थितं २ इंद्राय मेषस्य वपायै व ३
पां मेदः प्रे २ स्वाहाहृतां ऊ॰ गच्छतेति वपाश्रपणीनां प्रासनं॥ माध्यंदिनीयसवनीयनिर्वापे पात्राणां प्रयु

© Dharmartha Trust J&K. Digitized by eGangotri

रोडाशानां प्रथमं निर्वापः। आग्नेयोष्टाकपालः। ऐंद्राग्नो द्वादशकपालः। ऐंद्रोष्टाकपालः। ततऐंद्राद्यक्षसवनीयाः
॥ विभज्यालंभे। इदमग्नेरिंद्राग्न्योरिंद्रस्य वा। अन्यत्याक्ष्तं। द्वयोश्छागहृदययोरेकस्मूले अर्पणं। द्वितीये मेखस्य॥
एकस्यास्तु खायां छागयोरवदानमर्पणं। मेषस्य पृथक्तृत्रिःप्रच्युतानां हृदयानुन्नमानि कुरुतादिति प्रैषः। पशु
पुरोडाशयागे अग्नये पुरोडाशस्यानुब्रूहि। अग्नये पुरोडाशं। इंद्राग्निभ्यां पुरोडाशस्यानु इंद्राग्निभ्यां पुरोडाशं
य । इंद्राय पुरोडाशस्यानु इंद्राय पुरोडाशं। ऐंद्राग्नस्य चतुर्द्धाकरणं षडवत्तं ब्रह्मयजमानभागानाममभागः। इतरयोःस्क
ति सर्वं प्रतिप्रस्थातः पशुपुसं वदस्वेति प्रैषः। अग्नये छागस्य हविषोनु इंद्राग्निभ्यां छागस्य हविः ब्रूहि। इंद्राग्निभ्यां
छागस्य हविःप्रस्थितं प्रेष्य इंद्राय मेषस्य हविःप्र ३ अत्रापि प्रतिपशुदैवतसौविष्टकृतप्राशित्रेडावदानं।
न उपस्तृतिप्राशित्रेडयोस्तु तृतीयपशुवदानांतरं अभिघारा इति विशेषः। तृतीयसवने आग्रयणग्रहणानंत
रं एकया धारयोक्थ्यग्रहणं। सोमं प्रभावयेति प्रैषः। आग्निमारुतस्य पात्र प्रक्षालनांते समर्पणं कृत्वा त्रय उक्थ्यवि
ग्रहाः इंद्रावरुणाभ्यामिति प्रथमे ग्रहणमंत्रः। इंद्राबृहस्पतिभ्यामिति द्वितीये। इंद्राविष्णुभ्यामिति तृतीये। अन्य
त्सर्वं प्रातःसवनोक्थ्यवत्॥ अत्र त्रिष्वपि सवनेषु आग्रयणग्रहानंतरं वैकल्पिकाः षोडशिग्रहणकालाः। उपा
त्समयं ब्रुत स्तोत्रग्रहणं। तत्र खादिरपात्र मारायातिष्ठ वृत्रहन्निति वा युक्ष्वा हीति वा ग्रहणं॥ परिमार्जनं॥ प्रदक्षिण

© Dharmartha Trust J&K. Digitized by eGangotri

४ तद्विपरीतानृत्नी।। एषतरएतिमादनं। यस्मान्नजातइत्यध्वर्योः षोडशिनउपस्थानं। होतश्चमसपूर्वकंचमसोन्नयनं।।
तएणाभ्यां हिरंण्येनचग्रहस्तुपस्थश्यसदसंपुरस्तात्कृष्णवर्णैः श्रेष्ठप्रत्यक्कृत्वेस्थापितेसतिपुरस्ताज्ज्यानंतरंशस्त्रो
दि चेतरणहिरण्यांसमर्पयन्नुसोमोत्यरेभ्युपावर्त्तेधमितिस्तोत्रोपाकरणंकुर्यात।। अश्वः [illegible]ः प्रत्यक्कृत्वेः पूर्वस्यांस
दसोद्वारि। अपरस्यांप्रत्यक्कृत्वोवा। कृष्णाभावेश्यावः। तदभावेयःकोप्यश्वः। अश्वाभावेगोवी। अजोवा। स्तोत्रांते
होतुःशस्त्रं। तत्राध्वर्युः प्रतिगृह्णाति। विहूताहश्शस्यमानान्तेअवसाने उथामोदैवमदेइतिप्रतिगरः। मोदामोदै
वोथोइतिप्रणवे। अन्यत्रशाकृतं। उक्थशायजसोमानामितिप्रैषः। ग्रहचमसानांवषट्कारान्तेवषट्कारयोर्होमः
।। इदमिंद्रायषोडशिने। इदममये। अध्वर्योःप्रदक्षिणेतरथाहुत्नी।। ग्रहशेषस्यहोत्रध्वर्युभ्यांभक्षणं इंद्रस्त्वंस
प्राडितिअध्वर्योर्भक्षमंत्रः। होतुःसर्वचमसेष्वपवषट्कारनिमित्तोभक्षः। चमसिनोवसमाख्यानिमित्तः। सर्वेभ
क्षाश्चमसाः। मार्जालीयेग्रहपात्रचमसानांप्रक्षालनं। ततउल्मुकसमासाद्यतुयाजाः।। व्यूहने।। अग्नेरिंद्रस्यो
रिंद्रस्यवनस्पतेरिंद्रस्यवसुमतः। अग्निं इंद्रामीइंद्रोवनस्पतिरिंद्रोवसुमानिति।। अनन्तरहोमे।। इदमग्नयइंद्राग्नि
इं भ्यांइंद्रायवनस्पतयेइंद्रायवसुमतेनइवतआदित्यवतसभ्[illegible]तेविष्णुमतेवाजवतेबृहस्पतिमते। विश्वदेव्यावतेदेवे ४
भ्यआज्यपेभ्योग्नयेहोत्रायवाजिभ्यइति। अन्यत्सर्वेमग्नि[illegible]वत[illegible]रात्रावेषसर्वसमाप्यतदानीमेवसायमाहुतिं

© Dharmartha Trust J&K. Digitized by eGangotri

हुत्वाकालेप्रातराहुतिंकुर्यात्॥ इतिषोडशी॥ वाजपेयः क्रमेणैववक्ष्यते॥ अथातिरात्रेविशेषाउच्यंते॥ तत्रवर
णे। हुत्र स्तृष्टेनचतुष्टोमेनहिरण्यशतगवदक्षिणेनवासं। स्थदक्षिणेनचातिरात्रसंस्थेनज्योतिष्टोमेनाहंयक्ष्ये॥
सुत्यायामपरस्यांत्रपात्रासादनेवपाश्रपण्यौद्वेद्वे॥ द्वेशूले। द्वेउखे। द्विगुणरशनास्तत्रतः। पात्रयोजनेषोडशिपात्रम
धिकं। यमग्नइतिहविर्द्धानछदिषआलंभनंवा। तूष्णीमेवहविर्द्धानमध्येप्रवेशोवा। प्रातःसवनेआग्रयणग्रहणा
नंतरंवाषोडशिग्रहणादिसादनांतं॥ आहोमादस्यवीर्यावाग्यमनंवा॥ ततउक्थ्यादिग्रहणं। प्रतिप्रस्थातःपशुभिरे
हीतिप्रैषः। चत्वारःपशवः। द्वौप्रथमद्वितीयौछागौ। तृतीयोमेषः। चतुर्थीमेषीअजोवानियोजनेअग्नयेजुष्टं। इं
द्राग्निभ्यांजुष्टं। इंद्रायजुष्टंमेषं॥ सरस्वत्यैजुष्टंमेषींवाअजंवा। ४ सर्वेषांयूपएवबंधनं। गणधर्माएकादशिन्या
युक्ताः। अंतराशृंगबंधनादिएकैकस्ययूपेबंधनांतं॥ ततःप्रोक्षणादिएकैकस्याधस्तादुपोक्षणांतं। उत्तराघारानंतरंस
८ र्वेषांक्रमेणसलासम्प्रोक्षणीषंजनं। सर्वेषांत्वर्वसिम्यांललाटोपस्पर्शनं। अध्वर्योरष्टानांवेदितृणानामादानं। संज्ञपनार्थं
सर्वेषांयुगपन्नयनंनक्रमेण। सर्वेषांवपाश्रपणीभ्यामन्वारंभः। सर्वेषांशामित्रस्यपश्चादेवप्राक्संस्थंमारणं। नोदक्
संस्थं। संज्ञपयान्वगमन्। संज्ञप्ताःपशवः। माहिर्भूर्मापृदाकुः। पत्न्याःक्रमेणसर्वेषांप्राणशोधनं। ततोध्वर्युयज
मानयोरेकैकस्यपश्वात्पशोनिषेकांतं। उत्तानकरणादिप्लुलाजननांतमेकैकस्य। द्वेद्वेवपेपृथक्वपाश्रपण्योः। सर्व

© Dharmartha Trust J&K. Digitized by eGangotri

५ त्रयाणां सहैवाहवनीये प्रक्षेपः। सर्ववपानामग्निराज्यस्येत्यभिघारः पृथक्कृ। श्रुताः प्रचर। अग्निं गच्छ। इंद्राग्नी गच्छ।२ इं
द्रं गच्छ।३ सरस्वतीं गच्छेति प्राणदाने।४ प्रियाभ्यां धामभ्यामिति द्वयोर्द्वयोरासादनं। अग्नये छागस्य वपायै मेदसोऽनु·
वयां मेदः·१ इंद्राग्निभ्यां छागस्य वपायै· वयां मे·२ इंद्राय मेषस्य वपायै· वयां मेद·३ सरस्वत्यै मेष्या वपायै· वयां मेद·४
5 पक्षे सरस्वत्यै छागस्य वपायै·५ स्वाहाकृता ऊर्ध्वनभसं मारुतं गच्छतेति वपाश्रपणीभ्यां प्रक्षेपः। माध्यंदिनसवनी
यनिर्वापे पूर्ववच्चत्वारः पशुपुरोडाशाः। आग्नेयोऽष्टाकपालः। ऐंद्राग्नो द्वादश। ऐंद्रोऽष्टौ। सरस्वत्या अष्टौ। ततः ऐंद्रादि
सवनीयाः। विभज्यालंभे याच्च पुरोडाशपक्षे इदमग्नेरिंद्राग्न्योरिंद्रस्य सरस्वत्या इंद्रस्य च। शेषमग्निष्टोमवत्। श्रास्यां
तेनत्सं बहुधा त्रसं मार्गः। ततः पशुविशसनाद्यवदानग्रहणांतमेकैकस्यां तंत्रेण श्वभ्रे ऊवध्यलोहितप्रतिपत्तिः
एकैकस्मिन् शूले द्वयोर्द्वयोर्हृदययोः। एकैकस्यां पुखायां द्वयोर्द्वयोः श्रपणं। चतुर्थस्याजपक्षे त्रयाणामेकस्यां
पुखायां शूले च श्रपणं। मेषस्य पृथक्कृ। संकरवारणाय सर्वेषां वस्त्रेण बंधनं चिह्नकरणं वा। माध्यंदिनसवनेवा
प्याययणानंतरं षोडशिनो ग्रहणं सादनांतं। पशुपुरोडाशयागे तु प्रथमस्यावदानात्पूर्वं जुहूपभृतोरुपस्तारः।
अवद्यतीत्युवाचनं। अवदायाभिघार्य हविः प्रत्यभिघार्य। तिस्रो दातुर्हु। स्विष्टकृदर्थमवदायानभिघार्यैवातिक्रम्याग्नेय ५
यागः। प्रत्यागमस्तु नज्ञोऽह्वा जुपस्ती यावदायाभिघार्यायथ भृत्यवदायानभिघार्या इंद्राग्निभ्यां यागः। एवमेवेंद्राय

© Dharmartha Trust J&K. Digitized by eGangotri

मुपस्तीर्या

यागः॥ चतुर्थस्य जुह्वां अवदायाभिघार्य हविः प्रत्यभिघार्योपभृति स्विष्टकृदर्थमवदाय द्विरभिघारः॥ सरस्वत्यै यागः
॥ समानीय निर्गुणः स्विष्टकृद्यागः॥ अग्नये पुरोडाशस्यानु॰ पुरोडाशं प्रेष्य १ इंद्राग्निभ्यां पुरोडाशं २ इंद्राय पुरोडाश
स्य॰ डाशं॰ ३ सरस्वत्यै पुरोडाशस्य॰ पुरोडाशं प्रेष्येति विशेषः॥ तृतीयसवन सवनीयेषु सौम्य चरु निर्वापानंतरं आश्वि
नो द्विकपालः॥ ततो वभृथार्थी वारुण एककपालः॥ तृतीयसवने वा आग्रयणानंतरं षोडशिनो ग्रहणं॥ तत उक्थस्य॥
प्रतिप्रस्थातः पशुं संवदस्वेति प्रैषः॥ पशुप्रचारे प्रतिप्रस्थाता जुहूपभृतौ सा होमहवनीय प्राशित्रे डापात्रीं उपस्तीर्य जु
हूपभृतो हिरण्यमवधायाग्नेयपशोर्जौ हवानि जुह्वां अपभृता नु उपभृति वा वदाय जुह्वामेव हिरण्याभिघारो नोपभृ
ति॥ वसाग्रहणमाङ्गालनांतं॥ प्राशित्रे डापात्र्योर्यथास्वमवदानं॥ नोपर्यभिघारः॥ जाघनी गुदनिधानं॥ अग्नये छा
गस्य हविषोनु॰ हविः प्रस्थितं॰ १ वसा होमः॥ अवदान होमः॥ प्रत्यागत्य वसां पात्रांतरे कृत्वा जुह्वां वसा होमहवन्यां
चोपस्तारः॥ जुह्वां हिरण्यावधानं पूर्ववदवदानादि॥ इंद्राग्निभ्यां छागस्य हविषोनु॰ हविः प्रस्थितं २ एवमेवेंद्राय मे
षस्य हविषोनु॰ हविः प्रस्थितं ३ चतुर्थस्य पशोरवदानानंतरं जुहूपभृतौ उपहिरण्यनिधानं॥ सकृत् सकृत् अ
भिघारः॥ वसाग्रहणादि प्राशित्रेडावदानांतं॥ इडायां द्विरभिघारः॥ प्राशित्रे सकृत्॥ जाघनी गुदनिधानं॥ पशुसं
मर्शनं॥ सरस्वत्यै मेष्या हविषोनु॰ हविः प्रस्थितं पक्षे सरस्वत्यै छागस्य हविषोनु॰ हविः प्रस्थितं ४ वसा होमः॥ अव

© Dharmartha Trust J&K. Digitized by eGangotri

६ दानहोमः॥ वनस्पतियागः। स्विष्टकृद्यागः। वसाशेषानुसमासिच्यदिश्याघारणं। सर्वपशुसोमादीनांदानं। सर्वपशुषु
दतृतीयेसवनेपयज्ञः। सोमंप्रभावयेतिप्रैषः। यज्ञायज्ञीयपात्रप्रक्षालनांतेसर्वेषांकृत्वात्रयउक्थ्यविग्रहाः उक्थ्यवत्॥
ततउपांशुमयंसर्वेषांकृत्वाषोडशियागः। प्रागगृहीतस्योदञ्चह्नंतश्चतषोडशिनोग्रहणंसादनांतं। यस्मान्नजातइतिय
होपस्थानमध्वर्योः। ततश्चमसोन्नयनं। ह्नस्त्रेश्वसमीपेद्वारस्यपुरस्तात्स्वयपडुःस्तुवेस्थितेत्रिणाहिरण्येः स्तोत्रोपाकरणं
6 सोमोत्यरेत्सुपावर्त्तध्वमितिमंत्रेण। स्तोत्रांतेहोतुःशस्त्रं। ततप्रतिगरादिपात्रप्रक्षालनांतंषोडशिवत्॥ ततःपुनस
र्वेषांसर्पणं। ततस्त्रयोरात्रिपर्यायाभवंति। तत्रएकैकस्मिन्पर्यायेचत्वारिचत्वारिस्तोत्रशस्त्राणिभवंति॥ सर्वेष्व
पिदशभिर्दशभिश्चमसैर्यागः। तत्रस्तोत्रकर्त्तारस्तसर्वेत्रोद्गातारएव॥ शस्त्रकर्त्तारस्तुभिद्यंते॥ सर्वेषुपर्यायेषुप्र
थमंशस्त्रंहोताशंसति॥ द्वितीयंमैत्रावरुणः॥ तृतीयंब्राह्मणाच्छंसी॥ चतुर्थमच्छावाकस्य॥ तत्रहोतृप्रशास्तृप्राम
ध्वर्युःप्रतिगृणाति॥ ब्राह्मणाच्छंस्यच्छावाकाभ्यांप्रतिप्रस्थाता। सर्वत्रचमसैरेवयागः। प्रथमेहोतृचमसंगृहीत्वाश्रा
वणादिभक्षांतं॥ द्वितीयेप्रशास्तृचमसंगृहीत्वा॥ तृतीयेब्राह्मणाच्छंसिचमसंगृहीत्वा॥ चतुर्थेच्छावाकचमसंगृही ६
त्वेति। तत्रवषट्कर्त्तृचमसेवषट्कर्तृहोमकर्त्तारौभक्षः। वषट्कर्त्तुःसर्वचमसेवषट्कारनिमित्तः। चमसिनांचस्वस्व
चमसेसमाख्यानिमित्तोभक्षः॥ इदमिंद्रायेदमग्नयइतित्यागो॥ सर्वेषु॥ उक्थ्यशायजसोमानामित्येवसर्वेषुप्रैषः

© Dharmartha Trust J&K. Digitized by eGangotri

॥तत्रप्रथमस्यरात्रिपर्यायस्यप्रथमस्तोत्रारंभेउन्नेताहोतृचमसपूर्वकंदशस्वचमसेषुहुतशेषतःसोममुन्नयति।अध्वर्युस्तृणा
भ्यांहोतृचमसमुपस्पृश्योपावर्त्तध्वमित्युपाकरोति।स्तोत्रांतेहोताशंसति।अध्वर्युःप्रतिगृणाति।अत्रपर्यायेषुसर्वेशस्त्रांते
याज्यांतेचप्रदक्षिणावृत्तीनरथावृत्तीनभवतः॥अग्रहत्वाज्यशस्त्रांतेहोतृचमसमध्वर्युरादत्तेचमसाध्वर्यवइतरान्॥आश्रावये श्च
त्यशायजसोमानामितिप्रैषः।इतिवषट्कारेहोमः॥इदमिंद्रायेदमग्नयइतित्यागो।होतृचमसेहोतुरध्वर्योर्भक्षः।सर्वचमसेषु
वषट्कर्तुर्भक्षः॥चमसिनांसमाख्यानिमित्तः।सर्वभक्षान्तेचमसामार्जालीयेपात्रप्रक्षालनं॥२॥मैत्रावरुणचमसपूर्वकंनिधायो
न्नयनं।अध्वर्योरुपाकरणादिपात्रप्रक्षालनांतं॥३॥ततोब्राह्मणाच्छंसिचमसपूर्वकमुन्नयनं॥इतिप्रस्थातुःस्तोत्रोपाकरणं
॥ब्राह्मणाच्छंसिनःशस्त्रं॥प्रतिप्रस्थातुःप्रतिगरादिपात्रप्रक्षालनांतं॥ततोच्छावाकचमसपूर्वकंदशचमसानुन्नीयप्रति
प्रस्थातुःस्तोत्रोपाकरणमच्छावाकप्रतिगरदानंचमसहोमादिप्रक्षालनांतं।सर्वत्रत्यशायजसोमानामितिप्रैषः॥इद
मिंद्रायेदमग्नयइतित्यागो॥एवमेकोरात्रिपर्यायः॥पुनःसर्पणपूर्वकएवमेवनेष्टुःस्तोत्रशस्त्रेद्वितीयःपर्यायः॥पुनरपि
सर्पणपूर्वकस्तृतीयोरात्रिपर्यायः।ततःसर्पणंकृत्वाहोतृचमसादिषुविभज्यसर्वंसोममुन्नयति।ततस्तृणाभ्यांहोतृचम
समुपस्पृश्योपावर्त्तध्वमितिसंधिस्तोत्रोपाकरणं॥स्तोत्रांतेआश्विनशस्त्रंहोताशंसति॥तत्राध्वर्युःप्रतिगृणाति॥तच्छ
स्त्रंसूर्योदयानंतरंसमापयति॥तत्रशस्त्रांतेपूर्वदिनेतृतीयसवनेसोमचरणाग्नीयाग्रयणादानांतसंस्कारसंस्कृतमाश्वि

स्नहा १

© Dharmartha Trust J&K. Digitized by eGangotri

७ नमन्नीयश्रियेणधाग्नेत्यासाद्यग्रावाइत्यालम्यात्मालंभोदकालंभोकरोति॥ततोध्वर्युर्होतृचमसं दत्त्वेचमसाध्वर्यवेद्दतरान् प्रा
नवचमसान्॥ग्रतिग्रस्याताञ्जुहूपभृतावादायञ्जुह्वामुपस्तीर्यसर्वमध्याश्विनंज्जुह्वामवधायद्विरभिघार्योत्थायययज
तिदेशंगच्छति॥ताततोध्वर्युःप्रेष्यति।अश्विभ्यांतिरोह्न्यानंसोमानामनुब्रूहि॥ततआश्राव्याश्विभ्यांतिरोह्न्यानूसोमा
नप्रस्थितानूप्रेष्येति।ग्रतिवषट्कारंसर्वेषांचमसानांहोमः॥शेषग्रहणं॥आश्विनपुरोडाशस्यप्रथमवषट्कारेसर्व
स्यहोमः॥इदमश्विभ्यामिदमग्नये॥ततोहोतृचमसेहोतृध्वर्योर्भक्षः॥सर्वेषुहोतृवषट्कारनिमित्तःचमसिनांसमाख्या
निमित्तइति॥सर्वमहत्राश्चमसामार्जालीयेप्रक्षाल्यचात्वालस्यपश्चात्स्थाप्याः॥ततउल्मुकसमासार्यन्तुयाजाः॥ब्रू
हने॥अग्निरिंद्राग्न्योरिंद्रस्यसरस्वत्यावनस्पतेरिंद्रस्यवसुमतः।विश्वदेव्यावतःसोमस्याश्विनोतह्निति।अग्निरिंद्रा
ग्नीइंद्रःसरस्वतीवनस्पतिरिंद्रोवसुमान्॥विश्वदेव्यावान्सोमोश्विनोतमपन्तुरंत्विति॥प्रस्तरहोमेइदमग्नयाइं
द्राग्निभ्यामिंद्रायसरस्वत्यैवनस्पतयइंद्रायवसुमतेरुद्रवतआदित्यवतेस्वमतेविभुमतेवाजवतेबृहस्पतिम
तेविश्वदेव्यावतेदेवेभ्यआज्यपेभ्योग्नयेहोत्रायवाजिभ्योनमम॥र्उ॥शेषंसर्वमग्निष्टोमवत्॥इतिअतिरात्रः॥र्उ॥अ
थाप्तोर्यामेविशेषाउच्यंते॥तत्रवरणेगोत्रशर्मन्ऋत्विक्त्वेनवैराजादिसर्वपृष्ठगर्भेणचतुर्विंशचतुस्त्रिंशा
ष्टाचत्वारिंशाधिकासर्वस्तोमेनहिरण्यशतगावदक्षिणेनवासोग्न्दक्षिणेनचाप्तोर्यामेनाहंयक्ष्ये॥अत्रसर्वमतिरा ७

© Dharmartha Trust J&K. Digitized by eGangotri

त्रवद्भवति॥ एकत्रिचतुर्द्वादशापरिमितादीक्षाः॥ ॥तिस्र उपसदः॥ एकासुत्या॥ सुत्यायामतिरात्रवत्सवत्वाःसव
नीयपशवः॥ माध्यंदिने सवने माहेंद्रग्रहस्तोत्रे दक्षिणेन वेदिं रथसंसारणेन अश्वाणांमं डुडुभिशब्देन प्राकृततत्रण
म्यां चोपाकरणं॥ ततउज्ञातुस्रावग्निमंथनं॥ स्तोत्रांते भवतं न्नइत्याहवनीये जातामेः प्रक्षेपो अग्ने देग्नि रिरिति होम
आध्वर्यवः॥ ततो होतुः शस्त्रं॥ तत्र न्यूंखाः॥ ॐथो ॐ३ॐ३ ॐ३ ॐॐॐ ॐ३ ॐॐॐॐ३ मोदैवेति॥ तत्र प्रतिगरोवसाने॥ प्रणवे
प्राकृतः॥ ततो मैत्रावरुणप्रैषे सावकयोर्दयात्र करणं॥ ब्रह्मसाम्नि उपवाजिनैः॥ अच्छावाकप्रैषे संवाशिनेतां॥ त
त्रसदसः पुरस्तात्वत्सान्समातृभिः संयोज्यतं देवविये यंति॥ वत्सानुत्तरतो नयति॥ धेनुर्दक्षिणातः॥ ततो धेन
वो वत्सास्त्र शब्दं कुर्वंति॥ ततस्तोत्रारंभः॥ ततस्तृतीयसवने उक्थ्यविग्रहे सु मैत्रावरुणो वालखिल्यं शंसति॥ तत्र वि
हृतास्वसकृदुथामोदैवमदे॥ मोदामोदैवो थो इत्यवसाने प्रणवे च यथाक्रमं॥ अविहृतासु प्राकृतः॥ ततो ब्राह्मणा
च्छंसिनः शस्त्रे प्रतिगरविशेषः॥ तत्र विहितोऽनेऽतो रसस्तृतेत्याद्यासु त्रयोविंशति संख्यासु सकृन्न्यूंखोः॥ ॥तत्र ॐॐॐ३ का
ॐॐॐॐ ३ ॐॐॐॐ३ मदेथमदैवो३ ॐथामोदैवेत्यवसाने प्रतिगरः॥ प्रणवे प्राकृतः॥ ततो राज्ञो विश्वजनीनस्ये
त तिर्वस्त्रः पारिक्षित्यः॥ आसां तृतीये पादे प्रथमचतुर्थयोरक्षरयोर्वैपरीत्यं॥ तत्रो ॐ थामोदैवेति प्रतिगरेपि प्रथमच
तुर्थयोरक्षरयोर्वैपरीत्यं भवति॥ तत आदित्याहजरितरं गिरोम्य इत्यासु प्रतस्त्रु शस्यमानासु एवाहजरितरो थामो

© Dharmartha Trust J&K. Digitized by eGangotri

देवेत्यवसाने॥ तथाहञ्जरितरोथामोदेवेतिप्रणवे॥ इहेत्थप्रागपागुदगधरागितिचतस्रः प्रह्लिकाः। क्षुगित्यभिगरद्
तितिस्रः प्रतिश्राराः। आसांसप्तानांसप्तप्रतिगराः क्रमेण॥ अलाबूनिजरितरोथामोदेव॥१॥ पृषातकानिजरितरोथामो
देव॥२॥ पिपीलिकावटोजरितरोथामोदेव॥३॥ अश्वत्थपलाशंजरितरोथामोदेव॥४॥ स्वाजरितरोथामोदेव॥५॥
पर्णसदोजरितरोथामोदेव॥६॥ गोशफोजरितरोथामोदेव॥७॥ ततोवीमिदेवाइत्यस्यांपत्नीयियिश्यमानाजरि
तरोथामोदेवेत्यवसाने॥ होताविष्टीमेजरितरोथामोदेवेतिप्रणवे॥ ततोयद्देवासोललामगुमित्याद्याःस्कन्दू
२ खाः॥ तत्रप्रतिगरः॥ वीइ३ई३इ३इ३इ३ई३इ३ई३ई३किमस्यमिदमाहो२३उ२३उथामोदेवेत्यवसाने॥ ततोछ्वावकश
ह्वेप्रवोमहेमतयोयंत्वित्याद्युन्मूखाः॥ तत्रप्रतिगरः॥ ...मदोउ३उ३उ३उ३उ३उ३उ३उ३उ३उ३उ३मदेमधोमेदस्यमदि
रस्यमदेवो३उ३उथामोदेवेति॥ उक्थ्यान्तेसर्पणं॥ ततः ...उशी॥ ततस्त्रयोरात्रिपर्यायाअतिरात्रवत्॥ तत्रप्रति
पर्यायारंभेसर्पणं॥ ततःसर्पणं॥ संधिस्तोत्रं॥ ततआश्विनशस्त्रं॥ सोमस्यपरिशेषणं॥ सूर्योदयानंतरंचतुर्थोरा
त्रिपर्यायः॥ तत्रप्रतिस्तोत्रंसर्पणं॥ अन्यत्सर्वंरात्रिपर्यायवत्॥ इदमस्विभ्यामिदमग्नयइतित्यागौ॥ ततोनुयाजा
दि॥ ॥ इत्याप्तोर्यामः॥ इतियाज्ञिकप्रजापतिसुतयाज्ञिकदेवकृतसूत्रपद्धतौदशमोध्यायः॥ ॥१०॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri